॥ श्रीरामः शरणम् ॥

प्रतिगुरुवासरं
प्रकाश्यते

सम्पादकः
**डा. कृष्णप्रसादः जि.**

# आदिशिला

## साप्ताहिकी आदिशिलापत्रिका



द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

**प्रथमखण्डस्य** | **श्री विश्वावसु संवत्सर माघ फाल्गुन २०२६** | **प्रथमसङ्ख्या**

### *आदिशिलापत्रमञ्जूषा-१०*

## तर्कशास्त्रस्य प्रयोजनम्

*रचयिता - तर्कसंग्रहस्य सुखप्रवेशिनीव्यख्याया भूमिका*
*तर्कार्णवेन शिरोमणिना (उत्तमू) ति. वीरराघवाचार्येण विरचिता*

**एकः—** सखे सुन्दर! क्षोदक्षमं सार्वभौमं ते पाण्डित्यमिति सन्तुष्यामि ।

**अन्यः—** किं भोः परिहासेन? अधीतप्रायेऽपि तर्कशास्त्रे सन्ति शास्त्रान्तराणि सामग्र्येणाधिगन्तव्यानि, येषु मे सम्प्रति स्वल्प एव परिचयः ।

**एकः—** प्रकरणग्रन्थाः परिचिताः । इतस्ते कस्तत्र श्रमः । अस्माकं पुनरधीतमप्यनधीततुल्यम् ।

**अन्यः—** कथमेवमेकपदे सर्वथा जाड्यमभिनयसि ।

**एकः—** नायमभिनयः; यदस्ति तदुच्यते । यदि पुनर्नाटकादिपठनमेव नः कृत्यमभविष्यत्, नूनमयं क्लेशो न व्यज्ञास्यत । अलङ्कारग्रन्थाः पुना रसगङ्गाधरप्रभृतयः परीक्षार्थे परिक्लृप्तास्तर्कपद्धतिपरिष्कृता न बुद्धिमारोहन्ति ; न पठितुं शक्यन्ते ।

**परः—** सत्यमाह मित्रम् । विनैव काव्यानुवचनं सदा शास्त्रग्रन्थानेवाऽऽवर्तयतामपि प्रक्रियाभाग एव नः पाण्डित्यम् । मञ्जूषाभूषणसारादयस्तु तर्कसरणिमनुसरन्तः प्रायो दुरवगाहाः । का कथा व्युत्पत्तिवादविज्ञाने ।

**अन्यः—** ईदृशः श्रमो मीमांसाध्यायिनां न भवेदित्यालोचयामि ।

**अपरः—** वस्तुतस्तर्कशास्त्रे कियानपि प्रवेशो नःप्रवेशपरीक्षासमय एवावश्यकः । अन्यथा मीमांसापठनेऽप्यार्हन्ती न गण्यते । एवमप्यादरेणापठनादल्पमत्र ज्ञानं न भाट्टदीपिकादौ तर्कविद्भिर्विरचिते धारणप्रवचनपर्यन्तविधानाय प्रभवति । न तरां भाट्टरहस्ये ।

**अन्यः—** (इतरमवलोक्य) सखे! किमेवमवनतमुखो जोषमासीनो ध्यानपर इव लक्ष्यसे।

**इतरः—** किं ब्रह्म ध्यायामि। सुहृन्मणयो हृदयमुद्घाट्य शोचन्ति। अहं पुनरन्तर्विषण्णोऽस्मि। किं मे वक्तव्यमस्ति। एकतो मीमांसान्यायमेदुरेषु यत्र क्वचिद्व्याकरणस्पर्शिषु विशेषतस्तर्कनिकरपरिबृंहितेषु सिद्धिब्रह्मानन्दीयशतदूषणीन्यायसिद्धाञ्जनादिषु कथं नामानधीततर्कः पिपठिषामप्यधिगन्तुमलम्।

**अन्यः—** किमेवं सर्वेऽप्येकमुखं भाषन्ते। सुहृन्मणयः! यावद्यावत्तर्कशास्त्रग्रन्थे परिज्ञानम्, तावत्तावच्छास्त्रान्तरेषु सर्वत्र शोधनक्षमं शेमुषीप्रसरणमिति सत्यम्। अथापि मुक्तावलीपर्यन्तप्रकरणग्रन्थः प्रवेशतः प्रागेवाध्याप्यत इति कथं नु व एतावानायासः?

**इतरः—** अध्याप्यते। अथापि सुखप्रवेशस्तत्र नेति तदात्वे बुद्धेः परिश्रमं दातुमनिच्छन्तः उपेक्षितवन्तः स्मः। तदिदं साम्प्रतं क्लेशे पर्यवसितम्।

**परः—** तावान्परिश्रमस्तदैव चेत् क्रियते, किमिति तर्ककक्ष्याप्रवेशं परित्यक्ष्यामः। अधीते हि तर्के पश्चादश्रमेण सर्वमध्येतुं शक्यम्।

**अपरः—** सत्यम्। अयमत्र क्लेशः। तर्कसंग्रहो हि प्रथममधीयते। स चेत् केवलं प्रतिपदार्थमात्रग्रहणेनाधीयते, नोपरि ग्रन्थेषु सुलभः प्रवेशः। अत एव शाब्दबोधपद्धतिमपि तत्राध्यापकाः प्रदर्शयन्ति। यदि तया पद्धत्याऽधीयते, तत्र न सकृच्छ्रवणमात्रेण सर्वं बुद्ध्यत इति चिन्तनाऽपेक्षिता। तत्राध्यापकेनोच्यमानमन्यादृशम्। चिन्तनागुरुसरणिरन्यादृशी। पुनः प्रश्ने पुनरध्यापको बुद्धिबलेनान्यथा वक्ति। तत्र न किञ्चित् प्रतिष्ठितं भवति। एवमशक्त्या तदा विरतोद्योगाः पश्चाद्दीपिकामुक्तावल्यादिषु कथं पदमर्हन्ति?

**अन्यः—** सह व्याख्यानेन संग्रह आवर्तनीयः।

**इतरः—** सन्ति परं व्याख्याः। बोधप्रकारः कुत्रापि न सम्यगदर्शि। पट्टाभिरामादयस्तु क्वचिद्बहु वदन्ति। अन्यत्र जोषं गच्छन्ति। अपरत्र स्खलन्ति। न वा संपूर्णं बोधवर्णनं व्याख्यानं किञ्चिदस्तीति शृणुमः।

**एकः—** श्रुतं मया साम्प्रतमेकं व्याख्यानं सुखप्रवेशिनी नाम प्रचारोन्मुखं, यत्रापेक्षितोंऽशः प्रायः सर्वः समस्तीति। अपि दृष्टं सुन्दर!

**अन्यः—** इदमेवाहमप्यावेदयितुं प्रवृत्तः। प्रायेण हि प्रौढग्रन्थकारैः सर्वमपि शास्त्रं तर्कशास्त्रीकृतम्। तदस्याः सुखप्रवेशिन्याः सावधानमध्ययने सर्वत्रापेक्षिते सुखः प्रवेशो भवति। तन्मुखेनोत्साहेनाधीतान्यप्रकरणग्रन्थानां मीमांसावेदान्तसाहित्यव्याकरणादिषु तत्र तत्र सुखः प्रवेशः। तदिदं व्याख्यानं सुहृद्भिरादरेण ग्राह्यम्। अवश्यं च प्रचारं प्रापणीयम्।

**सर्वे—** अहो! भाग्यम्! महान् लाभः! तथैव करिष्यामः। सर्वमतः सम्पत्स्यते।

